# संस्कृतवार्ताः

**दिनाङ्क :- 22.07.2025**

**प्रात: - 06:55**

**वीपी-पदत्यागः**

उपराष्ट्रपति जगदीप धनखडः स्वास्थ्यकारणानि उद्धृत्य स्वपदात् त्यागपत्रं दत्तवान्। राष्ट्रपतिद्रौपदी मुर्मू इत्यस्यै लिखिते पत्रे धनखडमहोदयेन उक्तं यत् स्वास्थ्यसेवायाः प्राथमिकतायै चिकित्सापरामर्शस्य पालनाय च सः भारतस्य उपराष्ट्रपतिपदात् त्यागपत्रं दत्तवान्, यत् तत्क्षणमेव प्रभावी भवति। सः राष्ट्रपतिं कार्यकाले निरन्तरसमर्थनस्य कृते कृतज्ञतां प्रकटितवान्। श्रीधनखडः प्रधानमन्त्रिणः नरेन्द्रमोदिनः, आदरणीय-मन्त्रिपरिषदे अपि कृतज्ञतां प्रकटितवान्। सः अवदत्, प्रधानमन्त्रिणः सहकार्यं समर्थनं च अमूल्यम् अभवत्, अपि च स्व-कार्यकाले सः बहून् विषयान् अवगतवान्।

**संसदस्य मानसूनसत्रम्:**

संसदस्य मानसूनसत्रस्य प्रथमदिनम् ह्यः विपक्षदलैः विविधविषयेषु कृत-अनेकव्यवधानानां साक्षी अभवन्। ते पहलगाम आतङ्कवादी आक्रमणं, ऑपरेशन सिन्दूर इति विषये, अन्येषु विषयेषु च तत्कालं चर्चां कर्तुं आग्रहं कुर्वन्ति स्म। आकाशवाण्याः संवाददात्रा सूचितं यत्, एतेषु पूर्वोक्त-विषयेषु चर्चायाः निरन्तरं आग्रहं कृत्वा सदनद्वयं कोलाहलस्य साक्षी अभवत्। संसदीयकार्याणां मन्त्री किरेन रिजिजुः रक्षामन्त्री राजनाथसिंहः च आश्वासनं दत्तवन्तौ यत् संसदि प्रत्येकं विषये चर्चां कर्तुं सर्वकारः सज्जः अस्ति। परन्तु विपक्षस्य कोलाहलस्य कारणात् लोकसभायाः कार्याणां त्रिवारं स्थगनमभवत्। परन्तु राज्यसभायाः कार्याणि प्रातः एकवारं स्थगनानन्तरं सुचारुतया चालितानि। तन्मध्ये न्यायमूर्तिणः यशवन्त-वर्मा इत्यस्य निष्कासनाय केचन संसद-सदस्याः लोकसभा अध्यक्षाय ओम-बिर्ला-वर्याय ज्ञापन-पत्रं प्रदत्तवन्तः। संविधानस्य अनुच्छेदं चतुर्विंशत्युत्तर-एकशतम्, सप्तदशोत्तर-द्विशतम्, अष्टादशोत्तर-द्विशतम् इत्यन्तर्गतं न्यायमूर्तिणः वर्माविरुद्धं महाभियोगप्रस्तावे सर्वैः राजकीयदलैः आहत्य पञ्चचत्वारिंशदुत्तर-एकशतं लोकसभासदस्याः हस्ताक्षरं कृतवन्तः। न्यायाधीशः यशवन्तवर्मा इत्यस्य निवासस्थाने मुद्राराशेः प्रत्याग्रहण-सम्बद्धस्य विषये संसत्, अन्वेषण-अभियोगं करिष्यति।

**प्रधानमन्त्री नरेन्द्रमोदी**

प्रधानमन्त्री नरेन्द्रमोदी श्वः आरभ्य ब्रिटेन देशस्य मालदीवस्य च द्वयोः राष्ट्रयोः यात्रां करिष्यति। यात्रायाः प्रथमे चरणे प्रधानमन्त्री श्वः आरभ्य चतुर्विंशति दिनाङ्कपर्यन्तं ब्रिटेन-देशस्य समकक्षस्य कीर् स्टारमर इत्यस्य आमन्त्रणे ब्रिटेन-देशे भविष्यति। अस्मिन् भ्रमणावधौ प्रधानमन्त्री मोदी भारत-ब्रिटेन-द्विपक्षीयसम्बन्धानां सम्पूर्णपरिधिविषये प्रधानमन्त्रिणा स्टारमर इत्यनेन सह विस्तृतविमर्शं करिष्यति। निज-यात्रायाः द्वितीये चरणे प्रधानमन्त्री मोदी अस्य मासस्य पञ्चविंशति दिनाङ्कात् मालदीवस्य राष्ट्रपतिः डॉ. मोहम्मद मुइज्जु इत्यस्य आमन्त्रणे द्विदिवसात्मके मालदीव-यात्रायां भविष्यति। सः मालदीवस्य स्वातन्त्र्यस्य षष्ठीवर्षस्योत्सवे ' मुख्यातिथिः' भविष्यति। अस्मिन् अवधौ सः मालदीवस्य राष्ट्रपतिना सह मिलित्वा परस्पर-हितानां विषयेषु चर्चां करिष्यति।

**कावडयात्रा**

श्वः श्रावणशिवरात्रिः आभारतम् आचर्यते। तदुपलक्ष्य बहुसंख्याकाः काँवडयात्रिकाः भगवते शिवाय अर्पणार्थं पवित्रगङ्गजलस्य संग्रहं कृत्वा हरिद्वारतः स्वगन्तव्यस्थानानि प्रति शीघ्रं प्रत्यागच्छन्तः सन्ति। प्रफुल्लितजनसमूहस्य प्रबन्धनार्थं आरक्षिबलैः यातायातयोजना कार्यान्विता अस्ति।

**ऋतुः**

भारतस्य ऋतुविज्ञानविभागेन अद्य हिमाचलप्रदेशे उत्तराखण्डे च अत्यन्तं प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति। आगामिदिनद्वये उत्तरभारतस्य अनेकेषु भागेषु प्रचण्डवृष्टिः सम्भवति। पूर्व-मध्य-पश्चिम-ईशान्य-राज्येषु अपि आगामिषु द्वि-त्रि दिनेषु प्रचण्डवृष्टिः भविष्यति। ऋतुविज्ञानविभागेन इदमपि अनुमानितमस्ति यत् बिहार, जम्मू-कश्मीर, लद्दाख, झारखण्ड, ओडिशा तथा पश्चिम-बंगालराज्येष्वपि गर्जन-वज्रपातैः सह वृष्टिः भविष्यति।

**क्रीडाः**

बीसीसीआई इति भारतीय-क्रिकेट्-नियन्त्रणमण्डलेन सूचितम् यत्, सर्वाङ्ग-क्रीडकः नीतीशकुमार-रेड्डी जानु-व्रण-कारणात् इङ्ग्लैण्डविरुद्धं एण्डर्सन्-टेण्डुलकर-ट्रॉफी-क्रीडायाः अवशिष्टयोः द्वयोः टेस्ट्-क्रीडयोः न खेलिष्यति। चतुर्था टेस्ट्-क्रीडा श्वः म्यान्चेस्टरनगरस्य अमीरात् ओल्ड ट्रैफोर्ड् इत्यत्र आरभ्यते। आतिथेयः इङ्ग्लैण्ड्-देशः सम्प्रति पंच-क्रीडा-श्रृङ्खलायां द्वि-एकम् इत्यन्तरालेन अग्रे वर्तते।

**चतुरंग-विश्व-चषक**

जार्जिया देशस्य बटुमि इत्यत्र प्रचाल्यमानायाम् (FIDE) एफ्.आई.डी.ई. महिला-चतुरंग-विश्व-चषक-क्रीडायां भारतीय क्रीडिका दिव्यादेशमुखः उपान्त्यचक्रं प्रविश्यमाना द्वितीया भारतीयमहिला अभवत्। सा अधुना अन्तिमचतुष्टयसङ्घर्षे भारतीया-ग्राण्ड्-मास्टर कोनेरु हम्पी इत्यमुना सह सम्मिलितवती अस्ति। सेमीफाइनल्-क्रीडायां दिव्या चीनीय-ग्राण्ड-मास्टर-तान्-झोङ्गी-इत्यस्याः विरुद्धं संघर्षं करिष्यति।